International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(2): 45-47
© 2018 IJSR
www.anantaajournal.com
Received: 09-01-2018
Accepted: 15-02-2018

**डॉ. त्रिलोक झा**
ग्राम+पत्रालय- बलिया, बिरौल, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ. त्रिलोक झा**
ग्राम+पत्रालय- बलिया, बिरौल, दरभंगा, बिहार, भारत

# सामान्यवर्त्तिक-श्लोकवर्त्तिकयोः साम्यं वैषम्यञ्च

डॉ. त्रिलोक झा

**प्रस्तावना**

संस्कृतवाङ्मये त्रिमुनिव्याकरणस्य स्थानं महत्वपूर्ण विद्यते । तत्र सूत्रापेक्षया किञ्चिदपि न्यूनं महत्त्वं वृत्तेः वर्त्तिकस्य च न वर्तते। सूत्रे प्रतिपाद्यविषस्य अल्पाक्षरेण सूचनं भवति। अतः 'सूचनात् सूत्रमित्युच्यते' इतिं सूत्ररचना अतीव कठिना भवति। यतो हि अल्पाक्षरेण शब्देन विषयसूचनं तत्रोद्देश्यं भवति। यद्यपि सूत्रे ये अर्थाःप्रतिपादयितव्याः भवन्ति तेषाम् अवबोधः तत् तत् सूत्राणां वृत्त्या भवति। विना वृत्तिज्ञानेन सूत्रस्यार्थ-बोधनम् असम्भवमिव भवति। वृत्तेः लक्षणमुक्तेन् हरदत्तेन पदमञ्जर्याम् "सूत्रार्थप्रधानो ग्रन्थो वृतिः"। वृत्त्या एव एतत् स्पष्टं भवति यत् सूत्रमिदम् इष्टार्थप्रतिपादने समर्थं, तार्हि तत्र किञ्चित् परिवर्त्तनं शोधनं वा आवश्यकं न भवति। तत्रैव इष्टार्थ-प्रतिपादने आंशिकरूपेणापि सूत्रमसमर्थ भवति तर्हि तत्र परिवर्त्तनसंशोधनात्मकः ग्रन्थ एव वर्त्तिकग्रन्थः कथ्यते। तच्च वार्तिकं द्विविधं भवति सामान्यवर्त्तिक, श्लोकवर्त्तिकञ्चेति।

संस्कृतवाङ्मये वर्त्तिकस्य, अनेकाः परिभाषाः उपलभ्यन्ते। सर्वासु परिभाषासु शब्दानां न्यूनत्वाधिक्येऽपि सर्वासां परिभाषाणां निष्कृष्टार्थः एक एव भवति। स तु अर्थो विद्यते इष्टार्थप्रतिपादनाय सूत्रे संशोधनम्। संस्कृतवाङ्मये उपलब्धासु तत्परिभाषासु काश्चन निम्नलिखिताः सन्ति-

**पराशर उपपुराणे-**

1. उक्तानुक्तदुरूक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुः वर्त्तिकज्ञा मनीपिणः।।

2. **नागशभट्टेन-** 'उक्तानुक्तदुरूक्तचिन्ताकरत्वं हि वर्त्तिकत्वम्' इत्युक्तम्।

3. **विष्णुधर्मोत्तरपुराणे-**

प्रयोजनं संशय-निर्णयौ च, व्याख्याविशेषो गुरूलाघवञ्च।

कृतव्युदासोऽकृतशासनं च, स वार्तिको धर्मगुणोऽष्टकश्च। इति [1]। विष्णुधर्मोत्तरपुराणे(3-6)

वर्त्तिकस्य उपर्युक्तासु परिभाषासु दृष्टिपातेन कथयितुं शक्यते यत् सूत्रे उक्तानुक्तदुरूक्तानां विषयाणां विशेषरूपेण प्रतिपादनं येन ग्रन्थेन क्रियते स ग्रन्थः वर्त्तिकग्रन्थः कथ्यते।

वर्त्तिकस्याष्टौ धर्मगुणाः विष्णुधर्मोत्तरपुराणे कथिता, ते निर्दिष्टा एवं सन्ति।

तदनुसारेण वर्त्तिके निम्नलिखिताः अष्टौ गुणाः भवन्ति- 1. प्रयोजनम् 2. संशयः 3. निर्णयः 4. व्याख्याविशेषः 5. गौरवम् 6. लाघवम् 7. कृतव्युदासः 8. अकृतशासनम् इति सर्वे गुणाः यथा सामान्यवार्तिकेषु दृश्यन्ते तथैव श्लोकवार्तिकेषु। वर्त्तिकस्य ये उपर्युक्ताः धर्मगुणाः विष्णुधर्मोत्तरपुराणे उक्ताः तेषाम् उदाहरणत्वेन कतिपयानि सामान्यवार्तिकानि श्लोकवार्तिकानि च अत्रोदघ्रियन्ते।

**सामान्यवर्त्तिकस्य क्रमेणोदाहरणम्-**

**1. प्रयोजनम्-** "ङ्याप्प्रातिपदिकात्'' [2] इति सूत्रे ङ्याप्प्रातिपदिकग्रहणस्य प्रयोजनमुक्तम्। 2-3 **संशयो निर्णयश्च-** "आमन्त्रितं पूर्वमविद्यमानवत्'' [3] इति सूत्रे पूर्वंप्रति विद्यामात्वादुत्तर त्रानन्तर्याप्रसिद्धिः' इति

वार्तिकेन संशय उत्थापितो यत् 'इमं में गङ्गे यमुने' इति गङ्गे शब्दो यमुनेशब्दं प्रति अविद्यामनवद् भवति, न तु मे शब्दं प्रति। तत्रामन्त्रितस्य पदात् परस्य इत्यनुदात्तत्वं न स्यात् इति। अत्रैव पुनः 'सिद्धे तु पूर्वपदस्येति वचनात्' इति वार्तिकेन तस्य संशयस्य निर्णयः कृतो यत् पदपूर्वस्य चामन्त्रितस्य अविद्यमानवद्भावो भवति इति कथनेन अनुदात्तत्वं सेत्स्यति।

4. **व्याख्याविशेषः-** "तस्य भावस्त्वतलौ'' [4] इति सूत्रे भावशब्देन अभिप्रायस्यापि अतिप्रसङ्गः प्राप्नोति। अस्ति हि तत्र वार्तिकं "तस्य भाव इत्यभिप्रायादिष्वतिप्रसङ्गः इति। पुनस्तत्र "सिद्धं तु यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ" इति वार्तिकेन, यद्वा 'सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावस्तदभिधाने' इति वार्तिकेन च सूत्रस्य व्याख्याविशेषं प्रस्तूय अतिप्रसङ्गस्य वारणं कृतं विद्यते।

5-6 **गौरव-लाघवञ्च-** "हलदन्तात् सप्तम्याः संज्ञायाम्'' [5] इति सूत्रे' अकोऽत'इति तत्सन्ध्यक्षराथम्'' अयमेवाशयः स्पष्टीकृतो भाष्ये "एवं तर्हि अविशेषेण'' सप्तम्याः अलुकुक्त्वा अकोऽतः'' इति वक्ष्यामि, तन्नियमार्थ भविष्यति-अकोऽत एव भवति नान्यत इति। तत्सन्ध्यक्षरार्थम्, तेन सन्ध्यक्षराणां भवति इति।

7. **कृतव्युदासः** (क्रियमाणप्रत्याख्यानम्) ''गर्हायां लडपिजात्वोः'' [6] इते सूत्रे पठितेन 'गर्हायं लड्विधानानर्थक्यं क्रियासमाप्तिविवक्षितत्वात्' इति वार्तिकेन सूत्रे पठितस्य लड्ग्रहणस्य प्रत्याख्यानं कृतं विद्यते ।

8. **अकृतशासनम्** (अनुकतकथनम्) "समो गम्यृच्छिभ्याम्'' [7] इति सूत्रे पठितैः-

1. समोगमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम्।
2. अर्तिश्रुदृशिभ्यश्च।
3. उपसर्गादस्यत्यूह्योर्वा वचनम्।

इति वार्तिकैः तदाभिधानं कृतं येषां प्रयोगाः लोके भवन्ति, परन्तु तत्सिद्ध्यर्थं सूत्रे उल्लेखो नास्ति।

**श्लोकवर्त्तिकस्य क्रमेणोदाहरणम्-**

1. प्रयोजनम्- "इको झल्'' [8] इति सूत्रे पठितयोः निम्नलिखतयोः वर्त्तिकयोः ''झलादे सनः कित्त्वातिदेशस्य प्रयोजनम्'' प्रदर्शितं विद्यते। तद्यथा-

"इकः कित्वं, गुणो मा भूद्दीर्घारम्भकृते भवेत्।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते।।
सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयम्।
दीर्घाणां नाकृते दीर्घे र्णिलोपस्तु प्रयोजनम्।।

आभ्यां वर्तिकाभ्यां द्विविधं प्रयोजनम् उक्तम्-प्रथमं प्रयोजनम् चिचीषति इत्यादौ गुणनिषेधः। द्वितीयञ्च ज्ञीप्सति इत्यादौ णिलोपः।

2-3 **संशयः निर्णश्च –** "हयरवट्'' सूत्रे-

"प्रत्याहारेऽनुबधानां कथमज्ग्रहणेषु न।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः।।''

इति श्लोकवार्तिकेन अक्षरसमाम्नाये पठितानाम् अनुबन्धानाम् 'अच्' प्रत्याहारे ग्रहणं कथं न भवति इति संशयमुत्थाप्य तस्य समाधानञ्च प्रस्तुतम्।

4. **व्याख्याविशेषः** "अन्तर्वत्पतिवतोर्नुक्'' [9] इति सूत्रेण यत् अन्तर्वत्नी पतिवत्नी इति रूपं निपात्येते तयोः कोऽर्थो इति व्याख्याविशेषः निम्नलिखितश्लोकवार्तिके दृश्यते। तद्यथा-

"अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात्।
गर्भिण्यां जीवपत्यां च वा छन्दसि तु नुग्विधिः''।।

अत्र व्याख्याविशेषः प्रस्तुतः यत् अन्तरवर्त्तनी शब्दस्य प्रयोगः गर्भिणी इत्यर्थे पतिवत्नी इत्यस्य च प्रयोग 'जीवद्भर्तृका' इत्यर्थे भवति, तेन अन्तर् अस्ति अस्यां शालायां घटः, पतिमति पृथ्वी इत्याद्यर्थे तयोः शब्दे प्रयोगो न भवति।

5-6 गौरवलाघवञ्च – "वामदेवाड्ड्यड्यौ'' इति सूत्रे पठिते-

"सिद्धे यस्येति लोपेन किमर्थौ ययतौ डितौ।
ग्रहणं मा तदर्थेऽभूद् वामदेवस्य नञ्स्वरे।।''

इति वार्तिकेन द्वित्वकरणे गौरवलाघवचर्चा कृतो विद्यते।

7. **कृतव्युदासः** (क्रियमाणप्रत्याख्यानम्)- "मघवा बहुलम्'' [10] इत्यत्र पठितेन निम्नलिखितेन वार्तिकेन 'अर्वणस्त्रसावनञः' मघवा बहुलम् इति सूत्रद्वयस्य प्रत्याख्यानं कृतं विद्यते। तद्यंथा-

"अर्वणस्तृ मघोनश्च न शिष्यञ्छान्दसं कि तत्।
मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात्।।''

8. **अकृतशासनम्-**"व्रीह्यादिभ्यश्च'' इति सूत्रेण सामान्यतः मत्वर्थे "इनिठनौ'' प्रत्ययौ उक्तौ न च सर्वेभ्यः व्रीह्यादिभ्यः इनिठनौ इष्येते। तत्र हि केषुचित् शब्देषु इनिठनौ इत्युभयं भवति। केषुचिच्च इनिरेव केषुचिच्च उन्प्रत्यय एव। तत्र केषु इनिरेव, केषु च ठन् एव इति सूत्रेण अनुक्तं विद्यते। तत्र निम्नलिखितेन वार्तिकेन उक्तं यत् शिखादिभ्यः इन् प्रत्ययो भवति। यवरलादिभ्यश्च इकन् प्रत्ययो भवति। तद्यथा "शिखादिभ्य इनिर्वाच्य इनिर्वाच्य इकन् यवरलादिषु'' इति। इति तु महत्साम्यं सामान्यवर्त्तिकश्लोकवर्त्तिकयोः दृश्यते।

अनयोः वैषम्यन्तु एतत् दृश्यते यत् सामान्यवार्तिकं भाष्यकारेण अन्यूनाक्षरैः शब्दैः सम्पुटीकृत्य व्याख्यातम्। श्लोकवर्त्तिकन्तु बहुषु स्थलेषु तत्रत्याक्षराणाम् उल्लेखाभावेन, अल्पानामक्षराणाम् उल्लेखेन वा कुत्रचित् व्याख्यातं कुत्रचित् च अव्याख्यातं विद्यते। तद्यथा-

"भ्रस्जो रोपधयोरमन्यतरस्याम्'' [11] इति सूत्रे 'भ्रस्जादेशात्सम्प्रसारणं विप्रतिषेधेन' इति अन्यूनैर्भाव्याक्षरैव्र्याख्यातम्।

अपरं वैषम्यञ्च तद्यथा सामान्यवार्तिकानि यथा स्वातन्त्र्येण विधायकानि तथा श्लोकवार्तिकानि न क्वचिदपि विधायकानि किन्तु सूत्रवर्त्तिकव्याख्यानरूपाण्येव।

एतदतिरिक्तम् अनयोः वैषम्यम् एतदस्ति यत् सामान्यवार्तिकं पाणिनीव्याकरणस्य यथा अभिन्नङ्गत्वेन मन्यते येन एतद् व्याकरणं त्रिमुनिव्याकरणमिति कथ्यते। तथा श्लोकवार्तिकं सूत्रवार्तिकानुवादकमेव न तु स्वतः प्रमाणम्, तेषां प्रामाण्यन्तु सूत्रवर्त्तिकप्रामाण्ये मन्यते।

एवं हि श्लोकवार्तिके यद् वर्त्तिकत्वं विद्यते तत्तु वर्त्तिकगुणधर्मसाम्येनारोपितं विद्यते न तु तत्र वास्तविकवर्त्तिकत्वं कथयितुं शक्यते। एतदेवाभिप्रेत्य श्रीमद्भट्टोजिदीक्षितेन प्रौढमनोरमायाम्-

"नावक्लृप्तौ यदा दृष्टः पररूपस्य गोचरः।
एवस्तु विषयो वृद्धेर्नियमेऽयं यदा भवेत्।।" इति।

श्लोकवर्त्तिककृते श्लोकवर्त्तिकशब्दस्य प्रयोगविषये उक्तं यत् श्लोकवर्त्तिकम् इति शब्दस्य प्रयोगः नोचितः अपि तु वर्त्तिकश्लोक इति शब्दस्य प्रयोगो भवेत्। तद्यथा-

"यतु श्लोकवर्त्तिकमिदमित्याहुस्तद्भ्रभसात्"।

अत्र शब्दरत्नकारेण उक्तं यत्र 'वृत्तौ भवम्' इति व्याख्याने वर्त्तिकशब्दस्य" पूर्वनिपातापत्तिरित्याहुः'' एतेन प्रतीयते यत् श्लोको वार्तिके विरचितो विद्यते, न तु पाणिनीसूत्रे।

**सन्दर्भा: -**


1. विष्णुधर्मोत्तरपुराणे - 3-6 ।
2. पाणिनीयसूत्रम् - 4-1-1 ।
3. पाणिनीयसूत्रम् - 8-1-72 ।
4. पाणिनीयसूत्रम् - 5-1-119 ।
5. पाणिनीयसूत्रम् - 6-3-9 ।
6. पाणिनीयसूत्रम् - 3-3-142 ।
7. पाणिनीयसूत्रम् - 1-3-29 ।
8. पाणिनीयसूत्रम् - 1-2-9 ।
9. पाणिनीयसूत्रम् - 4-1-132 ।
10. पाणिनीयसूत्रम् - 6-4-128 ।
11. पाणिनीयसूत्रम् - 6-4-47 ।